अरालः, पुं, (ऋ + विच्, अरमालाति, आ + ला + क ।) सर्ज्जरसः । मत्तहस्ती । इति मेदिनी ॥ वक्रहस्तः । इति शब्दरत्नावली ॥

अराला, स्त्री, (अराल + स्त्रियां टाप्) वेश्या । कुलटा । इति शब्दरत्नावली ॥

अरिः, पुं, (ऋ + इन् ।) शत्रुः । इत्यमरः ॥ ("उपकर्त्त्रारिणा सन्धिर्न मित्रेणापकारिणा" । इति हितोपदेशे । [इति मनुः ।) "अनन्तरमरिं विद्यादरिसेविनमेव च" । चक्रं । इति त्रिकाण्डशेषः ॥ खदिरभेदः । तत्पर्य्यायः । सन्दानिका २ दाली ३ खदिरपत्रिका ४ । अस्य गुणाः । कषायत्वं । कटुत्वं । तिक्तत्वं । रक्तार्त्तिपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

अरित्रं, क्ली, (ऋच्छत्यनेन, ऋ + इत्र ।) कर्णः । हालि इति भाषा । तत्पर्य्यायः । केनिपातकः २ । इत्यमरः ॥ केनिपातः ३ । इति भरतः ॥ ("लोलैररित्रैश्चरणैरिवाभितः" । इति माघः ।)

अरिन्दमः, त्रि, (अरीन् शत्रून् कामादीन् वा दाम्यति दमयति, दम् + अन्तर्भूतण्यर्थे खच् मुम्, उपपदसमासः ।) शत्रुदमनकारकः । इति मुग्धबोधव्याकरणं ।

("यथाकामं यथोत्साहं यथाकालमरिन्दम ।
सेविता विषयाः पुत्र यौवनेन मया तव" ॥
"ज्ञात्वा तु तद्गृहं सर्व्वमादीप्तं पाण्डुनन्दनाः ।
सुरङ्गां विविशुस्तूर्णं मात्रा सार्द्धमरिन्दमाः" ॥
इति महाभारते ।)

अरिमर्दः, पुं, (अरिं रोगरूपं शत्रुं मृद्नाति, मृद + अण्, उपपदसमासः ।) कासमर्दवृक्षः । इति राजनिर्घण्टः । (त्रि, शत्रुमर्द्दनकारी ।)

अरिमेदः, पुं, (अरेर्विट्खदिरस्येव मेदः सारः यस्य सः ।) वृक्षविशेषः । गुइया वावला इति भाषा । तत्पर्य्यायः । इरिमेदः २ रिमेदः ३ गोधास्कन्दः ४ अरिमेदकः ५ अहिमारः ६ पूतिमेदः ७ अहिमेदकः ८ विट्खदिरः ९ । अस्य गुणाः । कषायत्वं । उष्णत्वं । तिक्तत्वं । भूतविनाशित्वं । शोथातिसारकासविषवीसर्पनाशित्वञ्च । इति राजनिर्घण्टः ॥

(अस्य व्यवहारो यत्र तदौषधं यथा,—
"तुलां पृतां नीलसहाचरस्य,
द्रोणेऽम्भसः संश्रपयेद्यथावत् ।
पूर्त्वा चतुर्भागरसे तु तैलं,
पचेच्छनैरर्द्धपलप्रयुक्तैः ॥
कल्कैरनन्ताखदिरारिमेद-
जम्बाम्रयष्टीमधुकोत्पलानां ।
तत्तैलमाश्वेव धृतं मुखेन,
स्थैर्य्यं द्विजानां विदधाति सद्यः" ॥ * ॥
महासहचरं तैलं ॥ इति वैद्यकचक्रपाणिसंग्रहः ॥)

अरिष्टं, क्ली, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः ।) सूतिकागृहं । ("अरिष्टशय्यां परितो विसारिणा सुजन्मनस्तस्य निजेन तेजसा" । इति रघुवंशे ।) अशुभं । तक्रं । मरणचिह्नं । (यदुक्तम्,
"रोगिणो मरणं यस्मादवश्यम्भावि लक्ष्यते ।
तल्लक्षणमरिष्टं स्याद् रिष्टमप्यभिधीयते" ॥) शुभं । इति मेदिनी ॥ उपद्रवः । तत्पर्य्यायः । उपलिङ्गः २ उपसर्गः ३ अजन्यं ४ ईतिः ५ उत्पातः ६ । इति हेमचन्द्रः ॥ (मद्यं । यथा । द्राक्षारिष्टं । दशमूलारिष्टं । वब्बूलारिष्टं ।
"अरिष्टं लघुपाकेन सर्व्वतश्च गुणाधिकम् ।
अरिष्टस्य गुणा ज्ञेया वीजद्रव्यगुणैः समाः" ॥
इति वैद्यके ।)

("मरणचिह्नार्थे लक्षणं यथा । नियतमरणख्यापकलिङ्गं ॥ इति माधवसंगृहीतरोगविनिश्चयग्रन्थटीकाकृद्विजयरक्षितः ॥ * ॥ तत्र प्रकृतवर्णोऽर्द्धशरीरे विकृतवर्णोऽर्द्धशरीरे द्वावपि वर्णौ मर्य्यादाविभक्तौ दृष्टा यथैवं सव्यदक्षिणविभागेन यथैवं पूर्व्वपश्चिमविभागेन यद्युत्तराधरदिभागेन यद्यन्तर्वहिर्विभागेनातुरस्यारिष्टमिति विद्यात्" ॥ इति चरकः ।
"शरीरशीलयोर्यस्य प्रकृतेर्विकृतिर्भवेत् ।
तत्त्वरिष्टं समासेन व्यासतस्तु निबोध मे" ॥
इति च सुश्रुतः ॥)

अरिष्टः, पुं, (रिष हिंसायां कर्त्तरि क्त, नञ्समासः ।) लशुनः । निम्बः । फेनिलवृक्षः । काकः । कङ्कपक्षी । इति मेदिनी । वृषभासुरः । इत्यनेकार्थध्वनिमञ्जरी ॥ मद्यविशेषः । इक्षुविकारसहिताभयाचित्रकदन्तीपिप्पल्यादिभिर्भेषजक्वाथादिसंस्कारवान् अरिष्टोऽभिधीयते । इति सुश्रुतटीका ॥ अस्य गुणाः । अर्शःशोथग्रहणीकफरोगनाशित्वं । इति राजवल्लभः ॥
("द्रवेषु चिरकालस्थं द्रव्यं यत्संहितं भवेत् ।
आसवारिष्टभेदैस्तत् प्रोच्यते भेषजोचितं ॥
यदपक्वौषधाम्बुभ्यां सिद्धं मद्यं स आसवः ।
अरिष्टः क्वाथसिद्धः स्यात्तयोर्मानं पलोन्मितं" ॥
इति शार्ङ्गधरः ॥ गुणोऽस्य यथा चरकेणोक्तः ॥
"शोकार्शोग्रहणीदोषपाण्डुरोगारुचिज्वरान् ।
हन्त्यरिष्टः कफकृतान्रोगान् रोचनदीपनः ॥ * ॥
दन्तीचित्रकमूलानामुभयोः पञ्चमूलयोः ।
भागान् पलांशानापोथ्य जलद्रोणे विपाचयेत् ॥
त्रिफलाया दलानाञ्च प्रक्षिप्य त्रिपलं ततः ।
रसे चतुर्थशेषे तु पूते शीते समावपेत् ॥
तुलां गुड़स्य तत्तिष्ठेत् मासार्द्धं घृतभाजने ।
तन्मात्रया पिबेन्नित्यं अर्शोभ्योऽपि प्रमुच्यते ॥
ग्रहणीपाण्डुरोगघ्नं वातवर्च्चोऽनुलोमनं ॥
दीपनञ्चारुचिघ्नञ्च दन्त्यरिष्टमिदं विदुः" ॥
इति दन्त्यरिष्टः । इति चरकः ॥
"अरिष्टो द्रव्यसंयोगसंस्कारादधिको गुणैः ।
बहुदोषहरश्चैव दोषाणां शमनश्च सः ॥
दीपनः कफवातघ्नः सरः पित्तविरोधनः ।
शूलाध्मानोदरप्लीहज्वराजीर्णार्शसां हितः" ॥
इति सुश्रुतश्च ॥)

अरिष्टकः, पुं, (अरिष्ट एव स्वार्थे क ।) फेनिलवृक्षः, इति शब्दरत्नावली ॥ रीठाकरञ्ज इति ख्यातः । अरिष्टशब्दार्थोऽप्यत्र ॥ रिठा इति भाषा । (अस्य गुणा यथा,—
"अरिष्टकस्त्रिदोषघ्नो ग्रहजिद्गर्भपातनः" ।
इति । एतत्फलचूर्णैर्हि कुतपानां नेपालदेशीयकम्बलानामित्यर्थः प्रक्षालनात् शुद्धिर्भवतीति शास्त्रविदां मतम् । यदुक्तं मनुना,
"कौषेयाविकयोरूषैः कुतपानामरिष्टकैः ।
श्रीफलैरंशुपट्टानां क्षौमाणां गौरसर्षपैः" ॥ इति)

अरिष्टतातिः, त्रि, (अरिष्ट + तातिल् ।) क्षेमङ्करः । शुभङ्करः । इति भूरिप्रयोगः ॥ (स्त्री, शुभाशंसनं । सौभाग्यबुद्धिः । कुशलातिशय्यं । "तदत्र भवता निष्पन्नाशिषां काममरिष्टतातिमाशास्महे" । इति महावीरचरिते ।)

अरिष्टदुष्टधीः, त्रि, (अरिष्टेन मरणसूचकनिमित्तेन दुष्टा धीरस्य ।) आसन्नमरणसूचितलक्षणेन दूषितबुद्धिः । मरणकुबुद्धियुक्तः । तत्पर्य्यायः । विवशः २ । इत्यमरः ॥

अरिष्टनेमिः, पुं, (अरिष्टस्य नेमिः, षष्ठीतत्पुरुषः ।) जिनानां चतुर्व्विंशत्यन्तर्गतद्वाविंशतितीर्थङ्करः । इति हेमचन्द्रः ॥ (विनतागर्भसम्भूतः स्वनामख्यातः कश्यपमुनिपुत्रः, यथा हरिवंशे,
"तार्क्ष्यश्चारिष्टनेमिश्च गरुड़श्च महाबलः ।
अरुणश्चारुणिश्चैव विनतायाः सुताः स्मृताः" ॥
दक्षेण प्रपौत्रश्चित्रकस्य पुत्रः स्वनामख्यातो राजा, यथा, हरिवंशे,
"चित्रकस्याभवन् पुत्राः पृथुर्विपृथुरेव च ।
अश्वग्रीवोऽश्ववाहश्च सुपार्श्वकगवेषणौ ।
अरिष्टनेमिरश्वश्च सुधर्म्मा धर्म्मभृत्तथा" ॥
स्वनामख्यातः प्रजापतिः । यथा रामायणे,
"आदिकाले महाबाहो ये प्रजापतयोऽभवन् ।
दक्षो विवस्वानपरोऽरिष्टनेमिस्तथैव च ।
कश्यपश्च महाभागस्तेषामासीदपश्चिमः" ॥)

अरिष्टसूदनः, पुं, (अरिष्टं तन्नामानमसुरं सूदयति यः, अरिष्टस्य सूदनः नाशक इति वा ।) विष्णुः । इति त्रिकाण्डशेषः । शुभाशुभनाशके त्रि ॥ (कृष्णः । स खलु माथुरे कल्पे अरिष्टनामानमसुरं सूदितवान् ।)

अरिष्टा, स्त्री, (अरिष्ट + स्त्रियां टाप् ।) कटुका । इति राजनिर्घण्टः ॥ कट्की इति भाषा । (स्वनामख्याता कश्यपपत्नी, सा हि सर्व्वान् गन्धर्व्वान् जनयामास । यथा,—
"अरिष्टा तु महासत्त्वान् गन्धर्व्वानमितौजसः" ॥
इति हरिवंशे ।)

अरुः, [स्] पुं, (ऋ + उसि ।) सूर्य्यः । इत्युणादिकोषः ॥ रक्तखदिरः । इति राजनिर्घण्टः ॥

अरुः, [स्] पुं, क्ली, (ऋ + उस् ।) व्रणं । क्षतं । इत्यमरः ॥

अरुः, [स्] क्ली, (ऋ + उसि ।) मर्म्म । सन्धिस्थानं । इत्युणादिकोषः ॥

अरुचिः, पुं, (न रुचिर्यत्र सः ।) रोगभेदः । स च सत्यभिलाषेऽभ्यवहारासामर्थ्यरूपः । इति रक्षितः ॥ तत्पर्य्यायः । अरोचकः २ अश्रद्धा ३ अनभिलाषः ४ । इति राजनिर्घण्टः ॥
("दोषैः पृथक् सह च चित्तविपर्य्ययाच्च,